प्रश्न 1. उच्चारणं कुरुत–

(उच्चारण कीजिए—)

सूर्यस्तपतु	जीर्णम्	शीतकालेऽपि
वारयितुम्	ग्रीष्मे	सस्यपूर्णानि
पदत्राणे	कण्टकावृता	क्षुधा-तृषाकुलौ

उत्तरम्–[नोट–इन पदों के अर्थ समझते हुए शुद्ध उच्चारण कीजिए।]

प्रश्न 2. श्लोकांशान् योजयत–

(श्लोकांशों का मिलान कीजिए–)

	क	ख
(i)	गृहं जीर्णं न वर्षासु	तौ तु क्षेत्राणि कर्षतः।
(ii)	हलेन च कुदालेन	या शुष्का कण्टकावृता।
(iii)	पादयोर्न पदत्राणे	सस्यपूर्णानि सर्वदा।
(iv)	तयोः श्रमेण क्षेत्राणि	शरीरे वसनानि नो।
(v)	धरित्री सरसा जाता	वृष्टिं वारयितुं क्षमम्।

उत्तरम्–

	क		ख
(i)	गृहं जीर्णं न वर्षासु	–	वृष्टिं वारयितुं क्षमम्।
(ii)	हलेन च कुदालेन	–	तौ तु क्षेत्राणि कर्षतः।
(iii)	पादयोर्न पदत्राणे	–	शरीरे वसनानि नो।
(iv)	तयोः श्रमेण क्षेत्राणि	–	सस्यपूर्णानि सर्वदा।
(v)	धरित्री सरसा जाता	–	या शुष्का कण्टकावृता।

प्रश्न 3. उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत–

(उपयुक्त कथनों के सामने 'आम्' तथा अनुपयुक्त कथनों के सामने 'न' लिखिए–)

यथा– कृषकाः शीतकालेऽपि कर्मठाः भवन्ति। [आम्]

कृषकाः हलेन क्षेत्राणि न कर्षन्ति। [न]

(क) कृषकाः सर्वेभ्यः अन्नं यच्छन्ति। [ ]

(ख) कृषकाणां जीवनं कष्टप्रदं न भवति। [ ]

(ग) कृषकः क्षेत्राणि सस्यपूर्णानि करोति। [ ]

(घ) शीते शरीरे कम्पनं न भवति। [ ]

(ङ) श्रमेण धरित्री सरसा भवति। [ ]

उत्तराणि–(क) आम्। (ख) न। (ग) आम्।
(घ) न। (ङ) आम्।

प्रश्न 4. मञ्जूषातः पर्यायवाचिपदानि चित्वा लिखत–

(मंजूषा से पर्यायवाची पद चुनकर लिखिए–)

रविः	वस्त्राणि	जर्जरम्	अधिकम्	पृथ्वी	पिपासा

वसनानि .....

सूर्यः .....

तृषा .....

विपुलम् .....

जीर्णम् .....

धरित्री .....

उत्तरम्–वसनानि – वस्त्राणि

सूर्यः – रविः
तृषा – पिपासा
विपुलम् – अधिकम्
जीर्णम् – जर्जरम्
धरित्री – पृथ्वी

प्रश्न 5. मञ्जूषातः विलोमपदानि चित्वा लिखत–

(मंजूषा से विलोमपद चुनकर लिखिए–)

धनिकम्	नीरसा	अक्षमम्	दुःखम्	शीते	पार्श्वे

सुखम् .....
दूरे .....
निर्धनम् .....
क्षमम् .....
ग्रीष्मे .....
सरसा .....

उत्तरम्– सुखम् – दुःखम्।
दूरे – पार्श्वे।
निर्धनम् – धनिकम्।
क्षमम् – अक्षमम्।
ग्रीष्मे – शीते।
सरसा – नीरसा।

प्रश्न 6. प्रश्नानाम् उत्तराणि लिखत–

(प्रश्नों के उत्तर लिखिए–)

(क) कृषकाः केन क्षेत्राणि कर्षन्ति?

उत्तरम्–कृषकाः हलेन क्षेत्राणि कर्षन्ति।

(ख) केषां कर्मवीरत्वं न नश्यति?

उत्तरम्– कृषिकाणां कर्मवीरत्वं न नश्यति।

(ग) श्रमेण का सरसा भवति?

उत्तरम्– श्रमेण धरित्री सरसा भवति।

(घ) कृषकाः सर्वेभ्यः किं किं यच्छन्ति?

उत्तरम्– कृषकाः सर्वेभ्यः शाकं अन्नं फलं दुग्धं च यच्छन्ति।

(ङ) कृषकात् दूरे किं तिष्ठति?

उत्तरम्– कृषकात् दूरे सुखं तिष्ठति।